**स्मील्** 1 P. (स्मीलति) To wink, blink.

**स्मृ** I. 5 P. (स्मृणोति) 1 To please, gratify. -2 To protect, defend. -3 To live. -II. 1 P. (Âtm. also in epic poetry) (स्मरति, स्मृत; *Pass.* स्मर्यते) 1 (*a*) To remember, bear or keep in mind, recollect, call to mind, be aware of; स्मरसि सुरसनीरां तत्र गोदावरीं वा स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि U. 1. 26. (*b*) To call to mind, call upon mentally, think of; स्मरात्मनोऽभीष्टदेवताम् Pt. 1; R. 15. 45. -2 To recite mentally or call upon the name of a deity &c.; यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः. -3 To lay down or record in a Smriti; तथा च स्मरन्ति. -4 To declare, regard, consider; निरतिशयं गरिमाणं तेन जनन्याः स्मरन्ति विद्वांसः Pt. 1. 30. -5 To remember with regret, yearn after, long or desire for (oft. with gen.); स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः Ki. 5. 28; कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति Me. 87; Mu. 5. 14; भवत्याः स्मरतात्यर्थमर्पितः (अङ्गुलीयकः) सादरं मम Bk. 8. 118. -6 To teach. -*Caus.* (स्मारयति-ते, but स्मरयति-ते in the last sense) 1 To cause to remember, remind, put in mind of, call to mind; अनेन मत्प्रियाभियोगेन स्मारयसि मे पूर्वशिष्यां सौदामिनीम् Māl. 1; sometimes with two acc.; अपि चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणान् स्मारयन्ति प्रकृतीः Mu.1; य एव दुःस्मरः कालस्तमेव स्मारिता वयम् U. 6. 34. -2 To give information. -3 To cause to remember with regret, cause to long or desire for; वरतनोः स्मरयत्यनिलोऽन्यदा Śi. 6. 56; 8. 64. -*Desid.* (सुस्मूर्षते) To wish to recollect.

**स्मृत** *p. p.* [स्मृ-क्त] 1 Remembered, recollected, called to mind. -2 Regarded, laid down, recorded, mentioned; प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ Ku. 2. 7. -3 Appointed, designed; तस्य त्वं रणशिरसि स्मृतो निहन्ता Ś. 6. 29. -4 Enjoined by a Smriti or traditional law. **-तम्** Remembrance, recollection; स्मृतं च तद्विदां राजन् येन चात्मा प्रसीदति Bhāg. 7. 11. 7. **-Comp. -मात्र** *a.* only remembered or thought of.

**स्मृतिः** *f.* [स्मृ-क्तिन्] 1 Remembrance; recollection, memory; अश्वत्थामा करधृतधनुः किं न यातः स्मृतिं ते Ve. 3. 21; संस्कारमात्रजन्यं ज्ञानं स्मृतिः T. S.; स्मृत्युपस्थितौ इमौ द्वौ श्लोकौ U. 6; 4. 2. -2 Thinking of, calling to mind. -3 What was delivered by human authors, law, traditional law, the body of traditional or memorial law (civil or religious) (opp. श्रुति). -4 A code of laws, law-book. -5 A text of Smriti, canon, rule of law; इति स्मृतेः. -6 Desire, wish. -7 Discrimination, discretion; स्मृतौ हतायां भृतमानदुर्दृशः Bhāg. 4. 3. 17. -8 Understanding. **-Comp. -अन्तरम्** another law-book. **-अपेत** *a.* 1 forgotten. -2 inconsistent with Smriti. -3 (hence) illegal, unjust. **-उक्त** *a.* prescribed or enjoined in the codes of law, canonical. **-जातः** the god of love. **-तन्त्रम्** a law-book. **-पत्रकम्** a register-book; राजाङ्कितलेखस्य धारयेत् स्मृतिपत्रकम् Śukra. 2. 287. **-पथः, -विषयः** the object of memory; स्मृतिपथं, स्मृतिविषयं गम् to be dead; सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः Bh. 3. 37; समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः 38. **-पाठकः** a lawyer. **-प्रत्यवमर्शः** retentiveness of memory, accuracy of recollection. **-प्रबन्धः** a legal work. **-भ्रंशः** loss or failure of memory. **-रोधः** temporary interruption of memory; loss or failure of memory; शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसि प्रभुता तवैव। Ś. 7. 32. **-विनयः** a reprimand given to a person by reminding him of his duty. **-विभ्रमः** confusion of memory. **-विरुद्ध** *a.* illegal. **-विरोधः** 1 opposition to law, illegality. -2 disagreement between two or more Smritis or legal texts; स्मृतिविरोधं परिहरति S. B.; cf. स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः Y. 2. 21. **-विषयः** the range of memory. **-शास्त्रम्** 1 a law-book, code, digest. -2 legal science. **-शेष** *a.* deceased, dead (as a person). **-शैथिल्यम्** loss of memory. **-संमत** *a.* approved by law. **-साध्य** *a.* capable of being proved by law. **-हीन** forgetful. **-हेतुः** a cause of recollection, impression on the mind, association of ideas.

**स्मृतिमत्** *a.* 1 Having full consciousness. -2 Remembering a former life. -3 Prudent, discreet. -4 Versed in law. -5 Anything which causes recollection.

**स्मेर** *a.* [स्मि-रन्] 1 Smiling; विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति Ku. 5. 70; Bv. 2. 4; 3. 2; Māl. 10. 6. -2 Blown, expanded, dilated, blooming; अधिकविकसदन्तर्विस्मयस्मेरतारैः Māl. 1. 28. -3 Proud. -4 Evident. **-रः** 1 A smile. -2 Manifestation, appearance. **-Comp. -विष्किरः** a peacock.

**स्यन्द्** 1 Â. (स्यन्दते, सस्यन्दे, अस्यदत्-अस्यन्त-अस्यन्दिष्ट, स्यन्त्स्यति-ते, स्यान्दिष्यते, स्यन्दितुं-स्यन्तुम्, स्यन्न; *desid.* सिस्यन्दिषते, सिस्यन्त्सति-ते; the स् of स्यन्द् is changed to ष् after a preposition ending in इ or उ) 1 To ooze, trickle, drop, drip, distil, flow; अयि दलदरविन्द स्यन्दमानं मरन्दं तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः Bv. 1. 5; Mu. 3. 7. -2 To shed, pour forth; स्यन्देते हि दिवा रुक्मं रात्रौ च द्विजसत्तम Mb. 14. 57. 25. -3 To run, flee. -4 Appear, occur; स्यन्दन्ति चाप्यनिष्टानि गात्रं सीदति चाच्युत Mb. 7. 72. 4.

**स्यदः** 1 Speed, rapid motion, rush, velocity; प्रतन्व्यः कोमला विन्ध्ये सहितारः स्यदं न ते Bk. 22. 5. -2 Driving, oozing.

**स्यन्दः** [स्यन्द्-भावे घञ्] 1 Flowing, trickling. -2 Going rapidly, moving. -3 A car, chariot. -4 Fluxion; Suśr. -5 Trickling perspiration; यत्र क्वचन स्यन्देनाभिपतति Bhāg. 5. 21. 9. -6 A particular eye-disease. -7 The moon.

**स्यन्दन** *a.* (**-ना** or **-नी** *f.*) [स्यन्द्-ल्यु ल्युट् वा] 1 Going quickly, fleet; flowing. -2 Quick, swift of foot, fleet; स्यन्दना नो चतुरगाः Ki. 15. 16. **-नः** 1 A war-chariot, a car or chariot in general; धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः Ś. 1. 33; N. 15. 92; R. 1. 36. -2 Air, wind. -3 A kind of tree (तिनिश). **-नम्** 1 Flowing, trickling, oozing. -2 Rushing, going or flowing quickly. -3